Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १४ अङ्क : १६०
सप्टेम्बर - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### दुष्टे दुष्टं समाचरेत्

नवदशे शतके आङ्ग्लप्रशासनं भृशं तपति स्म। तदानीं तद्गताः बाह्याः विचाराः भारते आक्रमणं कृतवन्तः। तथा जापाने अभवत्। तत् राष्ट्रम् अपि वैदेशिकैः विचारैः आक्रान्तम्। परन्तु उभयत्र परिणामः विपरीतः अभवत्। जापानः उन्नतिं प्राप्नोत्, भारतं च शृङ्खलितः पशुः इव तत्रैव अतिष्ठत्। जापानेन दुर्बलान् विचारान् अवधूय सुचारु परिवर्तनं कथं कृतम्? भारतं च किमर्थं विफलम् अभवत्? अत्र श्रीमतः अरविन्दस्य चिन्तनं प्रस्तुतम् अस्ति। सः लिखति यत्, यदा बाह्याः विचाराः जापानं प्रति आक्रमणं कृतवन्तः तदा तेन देशेन स्वीयः सत्त्वपूर्णः स्वभावः न त्यक्तः। तस्य स्वभावस्य लाक्षणिकं प्रतीकम् अस्ति – 'समुराई'। जापाने युद्धकुशला काचित् जातिः तन्नाम्ना प्रसिद्धा। सा जातिः हिंसाप्रिया नास्ति, किन्तु अहिंसायाः दासी अपि नास्ति। भारतजापानयोः मार्गविभाजकम् (डिवाइडर) अत्रैव दृश्यते।

अथ भारते अपि वैदिशिकात् स्पर्शात् कश्चित् वर्गः उत्पन्नः। तस्य नाम अस्ति – 'बुर्झ्वा'। बुर्झ्वा अर्थात् बहुधा सन्तुष्टः मध्यमवर्गीयः मनुष्यः। सः सहनशीलः, सुखाभिलाषी, सुरक्षाप्रियः, शान्तिप्रार्थी साधारणः मनुष्यः। भद्रस्य अपि तस्य मर्यादाः अनेकाः। सः साहसं कर्तुं न शक्नोति। आक्रमणं तस्य प्रकृतिः नास्ति। बुर्झ्वावर्गः समाजाय स्थिरतां दातुं शक्नोति, राजनीतिं च भूषयितुं शक्नोति, किन्तु राष्ट्रं प्रोन्नते शिखरे प्रतिष्ठापयितुं न शक्नोति। सः समाजं प्रशान्तं कर्तुं शक्नोति, किन्तु प्रचण्डं कर्तुं न शक्नोति।

अधोमुखः एषः वर्गः आङ्ग्लशासकानां तान्त्रिकीं व्यवस्थां पश्यति स्म। एतस्य भद्रजनस्य त्रीणि कार्याणि प्राधान्येय गणयितुं शक्नुमः – धनार्जनं, सन्ततेः शिक्षणं, विवाहोत्सवादीनाम् आयोजनं च। आङ्ग्लप्रशासकाः एतादृशीः एव प्रजाः इच्छन्ति स्म। स्मर्तव्यं यत् स्वातन्त्र्यसङ्ग्रामे अपि सुरक्षाप्रियः बुर्झ्वावर्गः अधिकारिणां पादप्रक्षालने व्यापृतः आसीत्!

एषः कातरः स्वभावः मूलतः भारतीयः नास्ति। पुरातनः भारतीयः स्वभावः क्षणं स्मर्यताम्। तदानीं भूमण्डलं चाणक्यस्य तेजसा तेजोमयम् आसीत्। समराङ्गणे मरणं क्षत्रियाणां महोत्सवः आसीत्। भीष्मस्य पराक्रमे तु कृष्णस्य अपि सन्देहः न आसीत्। सावित्री, सीता, द्रौपदी च भारतीयं स्वभावं पुरस्कर्तुम् अलम्।

याः प्रजाः वीरोचितं स्वभावं त्यजन्ति ताः हिंसकैः नितरां हन्यन्ते। चाणक्यः लिखति–

**कृते प्रतिकृतं कुर्यात् हिंसने प्रतिहिंसनम्। तत्र दोषो न पतति दुष्टे दुष्टं समाचरेत्॥**

# गोलाकारिकायाः शिलायाः कथा



विद्यानन्दस्वामी विजयपुरम् आगतवान् । तस्य ग्रामस्य प्रमुखः विश्वपतिः स्वगृहे तस्य वासं परिकल्प्य तं योग्येन आतिथ्येन सत्कृतवान् । तस्य प्रवचनार्थं सभामण्डपादिकं निर्मातुं प्रभूतं धनम् अपि सः दत्तवान् । अतः प्रवचनमण्डपे विद्यानन्दस्वामिनां पीठस्य पार्श्वे एव एकं भव्यम् उत्कृष्टम् आसनं परिकल्पितं व्यवस्थापकैः ।

प्रवचनारम्भात् किञ्चित् पूर्वं तत् स्थलम् आगतवान् विश्वपतिः । यद्यपि सः आसनम् अपश्यत्, तथापि तस्मिन् अनुपविशन् सामान्यैः सह भूमौ एव उपाविशत् । एतत् लक्षितवद्भिः व्यवस्थापकैः बहुधा निवेदितं चेदपि आसने उपवेशनं सर्वथा न अनुमतं तेन ।

विद्यानन्दस्वामिवर्येण अपि एषः प्रसङ्गः अवलोकितः एव । तस्मै विश्वपतेः एषः व्यवहारः विशेषतः अरोचत । अतः एव प्रवचनसमये सः – "मानवेषु ये गुणाः अवश्यं भवेयुः तेषु विनयः प्रधानः । यत्र विनयः भवति तत्र सहनाशक्तिदैवभक्त्यादयः अवश्यं भवन्ति । सम्पद्भवनपत्नीपुत्रादयः पूर्वजन्मनः पुण्यस्य परिणामतः प्राप्यन्ते इति प्राज्ञाः वदन्ति । यत् प्राप्तं तस्य परिरक्षणाय प्रयासः अवश्यं करणीयः । इहलोकसुखं न शाश्वतम् । अतः लोके सर्वैः अपि परलोकसुखार्थम् एव अधिकः प्रयासः करणीयः । सद्व्यवहाराः एव इहलोके परलोके च उपकुर्वन्ति । विनयः तेषु प्रमुखः । अस्माकं स्थितिः उच्चा नीच वा स्यात् नाम, तथापि विनयः तु कदापि न परित्यक्तव्यः । यत्र विनयः तत्र गर्वादीनाम् अवकाशः न भवति । अत्र उदाहरणरूपेण अहं गोलाकारिकायाः कस्याश्चित् शिलायाः कथां श्रावयामि" इति उक्त्वा कथाम् आरब्धवान्–

गोदावरीनद्याः तटे आम्रनारिकेलादयाः विविधाः वृक्षाः आसन् । कदाचित् गोदावर्यां महापूरः उत्पन्नः । महावेगकारणतः पर्वतस्था काचित् शिला प्रवाहेण सह आगता । नदीतटे स्थितानां नारिकेलवृक्षाणां मध्ये अवरुद्धा सती अतिष्ठत् सा । नारिकेलवृक्षाणां मूलैः बद्धा सा अग्रे न अगच्छत् ।

अल्पे एव काले प्रवाहवेगः क्षीणः जातः । सूर्यकिरणानां कारणतः सा शिला शोभमाना जाता ।

तां लक्षितवान् कश्चन उन्नतः नारिकेलवृक्षः अपृच्छत् – "अये ! भवती कुतः अत्र आगता ? कथम् अत्र स्थिता ? अग्रे कुतः न गतम् ?" इति ।

शिला तु किमपि उत्तरं न अवदत् । अत्रान्तरे वृक्षस्य उपरि स्थितम् एकं नारिकेलफलं सोपहासम् अवदत्– ''एतस्याः कथाम् अहं जानामि । एतस्याः जन्म पर्वतस्य उपरि । प्रवाहवेगकारणतः शिलाः भग्नाः भवन्ति, प्रवाहेण नीयन्ते च । तथा आगता अस्ति एषा शिला । प्रवाहस्य आघातान् प्राप्य एषा गोलाकारिका जाता अस्ति । यदि अस्माकं मध्ये एषा पतिता न स्यात् तर्हि पुनरपि छेदं प्राप्य सिकताकणत्वं गता सती समुद्रे विलीना अभविष्यत्'' इति ।

''यथा प्रहारः तथा आकारः । किम् एतत् अपि किञ्चन जीवनम् ? धिक् एतत् जीवनम् !! वयं तु साभिमानं शिरः उन्नमय्य आकाशे तिष्ठामः । आनन्देन गर्वेण च जीवामः वयम्'' इति अवदत् अपरं नारिकेलफलम् ।

गोलशिलया किमपि प्रत्युत्तरं न उक्तम् । एवमेव कालः गतः ।

नदीतीरसमीपे कश्चन शिवालयः आसीत् । कश्चन भक्तः स्थालिकायां नारिकेलपुष्पगन्धवर्तिकादीनि संस्थाप्य तं शिवदेवालयम् अगच्छत् । नारिकेलं शिवलिङ्गस्य पुरतः अस्थापयत् ।

नारिकेलेन त्रीणि अपि नेत्राणि विशालीकृत्य शिवलिङ्गं दृष्टम् । तेन अभिज्ञातं यत् पूर्वं कदाचित् वृक्षाणां मध्ये दृष्टा गोलशिला एव एषा इति ।

तावता सा मूर्तिरूपा शिला अपृच्छत्– ''अये मित्र ! भवतः उच्चस्थितिः गर्वः च क्व गतः ? अपमानसहनस्यापि कापि सीमा स्यात् इति उक्तम् आसीत् खलु भवता ? आत्मानम् अमरं मत्वा पूर्वं मयि महती उपेक्षा दर्शिता आसीत् भवता । किन्तु अद्य किं जातम् ? किमर्थम् एषा क्षीणा दशा प्राप्ता भवता ?'' इति ।

तावता अर्चकः अन्यया शिलया घट्टयित्वा नारिकेलस्य भङ्गम् अकरोत् । तदा पश्चातापदग्धेन नारिकेलेन उक्तम् – ''आर्ये ! क्षन्तव्यः अहम् । वृक्षस्य ऊर्ध्वभागे स्थितः अहं गर्वेण व्यवहरामि स्म । अधः स्थितान् धिक्करोमि स्म । अद्य तु भवत्याः सर्वपूज्यता । मम च नैवेद्यरूपता । भवत्या उन्नते पर्वते जन्म प्राप्तम् । पवित्रायां गोदावर्यां वासः कृतः । कष्टानि बहुधा सोढानि । अतः एव अद्य एषा पूजार्हता प्राप्ता अस्ति भवत्या । सहना विनयश्च भवत्याः गुणः आसीत्'' इति ।

अर्चकेण पश्चात्तापदग्धं तत् नारिकेलं शिवाय अर्पितम् । तस्मात् तत् पवित्रं जातम् । प्रसादरूपेण तस्य वितरणं प्रवृत्तम् ।

एवं कथां समाप्य विद्यानन्दस्वामिवर्यः पुनः अवदत् – ''नदीप्रवाहे यथा गोलशिलया विविधानि कष्टानि सोढानि तथा मानवेन अपि जीवने अनेकानि कष्टानि सोढव्यानि भवन्ति । यः सर्वं सोढ्वा अग्रे गच्छति सः एव उन्नतां स्थितिम् अवाप्नोति । तस्यैव जीवनं धन्यं भवति । सः एव पूज्यः भवति लोके । यः तु महता गर्वेण व्यवहरति सः नारिकेलम् इव अन्याधीनताम् अनुभवति निश्चयेन । जीवने तेन कदाचित् वा महान् पश्चातापः अनुभोक्तव्यः भवति एव'' इति ।

## वैश्विकपर्यावरणादिसमस्यानां परिहाराय वैदिकयज्ञपरम्परायाः आवश्यकता

भाविन पाठकः

पर्यावरणम् इत्येकः व्यापकः शब्दः अस्ति । परि+आङ् +वृ, परि+आवरणम् इति संस्कृत-शब्दार्थ-कौस्तुभः । यत् परितः आवरयति आच्छादयति वा इति पर्यावरणम् । पर्यावरणं विभिन्नशक्तीनां परिस्थितिनां पदार्थानां च योगः अस्ति येन मानवजगत् परावृत्तः भवति अपि च मानवानां क्रियाकलापान् अनुशासयति । अस्मान् परितः उपलब्धाः पदार्थाः परिस्थितयः च अस्माकं क्रियाकलापान् प्रभावयन्ति । अत एव वैदिकमनीषिभिः द्युलोकादारभ्य लघुजीवनपर्यन्तं समस्तभूतमात्राय शान्तेः प्रार्थना कृता अस्ति ।

**द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः सान्तिरोषधयः शान्तिः**
**वनस्पतयः शान्तिः विश्वे देवाः शान्तिर्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्ति रेधि ।**

(यजु. ३६.१७)

वेदेषु सूर्यवाय्वग्निवरुणान् निमित्तिकृत्य रक्षार्थं प्रार्थना कृता अस्ति । नैकेषु मन्त्रेषु दिव्य-पार्थिव-जलीयदेवेभ्यः कल्याणस्य कामना स्पष्टरूपेण उल्लिखिता दृश्यते । इत्थं वैदिककालादारभ्य तत्त्वचिन्तकैः ऋषिभिः पर्यावरणं प्रति चिन्तां प्रकटयित्वा पर्यावरणस्य रक्षणार्थं मानवस्य उत्तरदायित्वस्य निर्वहणस्य प्रेरणा प्रदत्ता अस्ति।

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । त्येन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥**

अयं शुक्लयजुर्वेदस्य ईशोपनिशदः मन्त्रः । जगत्यां यत् किं च जगत् अस्ति इदं सर्वं ईशावास्यम् । तेन त्यक्तेन भूञ्जीथाः । कस्यस्वित् धनं मा गृधः । अत्र तेन त्यक्तेन भूञ्जीथाः इति अद्यत्वे अत्यावश्यकं चिन्तनं भवितुमर्हति । क्षणिकसुखलाभाय स्वस्वार्थनिरताः लोलुपाः आधुनिकाः जनाः अविचिन्त्य कथञ्चिदपि पृथिव्याः अनावश्यकं दोहनं कुर्वन्ति । एतेन प्रकृतिचक्रं विकृतं जातमस्ति । परिणामतः प्रदूषण-अतिवृष्टि-अनावृष्टि-भूकम्पभयानकरोग-ऋत्वागमनभेदादयः समस्याः प्राणिमात्रं पीडयन्त्यः सन्ति । एतस्य परिहाराय वैदिकऋषिभिः उक्तः यज्ञकर्मणां प्रयोगः आवश्यकः भवितुमर्हति।

**वैश्विकपर्यावरणादिसमस्याः** -महर्षिणा यास्काचार्येण स्वग्रन्थे निरुक्ते षड् भावविकाराः वर्णिताः सन्ति। अस्मिन् पर्यावरणस्य कृते सत्ता इति शब्दं चिन्तयितुं शक्यते। महर्षिणा उक्तं यत् यत् आत्मानं धारयितुं शक्नोति तदेव स्वसत्तां रक्षति। यदा कार्ये अयोग्यः हस्तक्षेपः भवति तदा तस्य आत्मधारणशक्तिः नष्टा भवति तदेव प्रदूषणम् अस्ति। पदार्थानां निर्माणस्य अनुपातः स्थिरः आवश्यकः। अनुपातभङ्गेन पदार्थस्वास्थ्यं नष्टं भवति। एतदेव प्रदूषणम् इति वक्तुं शक्यते। भौतिकप्रदूषणेन मानसिकप्रदूषणमपि भवितुं शक्नोति। भौतिकप्रदूषणस्य प्रत्यक्षं परोक्षं वा प्रभावः मनसि आत्मनि च प्रभावं जनयति। एतेन ग्लानिः दुःखं अविश्वासः उत्साहह्रासः इत्यादयाः मनोरोगाः अपि भवितुं शक्नुवन्ति।

विज्ञानस्य प्रयोगेण मानवजातिः पृथिव्याः अविचिन्त्य दुरुपयोगं कुर्वन्ति। जलसंरक्षणस्य स्थाने जलस्य अत्यधिकः अनावश्यकः उपयोगः भवति। नदीजलाशयेषु मलमूत्रादिनां विसर्जनं क्रियते। जलाशयेषु अवकरादिनां विसर्जनेन उद्योगानां विषाक्त-रासायणिकजलेन जलसृष्टिः प्रभाविता जाता अस्ति। मृत्तैलचालितयानानां विषयुक्तः धूमः वातावरणं प्रदूषितं करोति । सततं वृक्षाणां छेदनं कृत्वा उन्नतभवनानां निर्माणं वर्धितमस्ति । एतेन वन्यजीवसृष्टिह्रासः जातः अस्ति। परिणामतः कासादारभ्य कर्करोगपर्यन्तं नैके रोगाः जनान् कवलीकुर्वन्ति। (क्रमशः)

## मासवार्ता

### आरब्धा संस्कृत-साहित्य-रसास्वाद-व्याख्यानमाला



संस्कृत-साहित्य-अकादमी, गान्धिनगरम् एवं च संस्कृतविद्याप्रतिष्ठानम्, अहमदाबाद इत्यनयोः संयुक्तोपक्रमेण आरब्धा संस्कृत-साहित्य-रसास्वाद-व्याख्यानमाला । अस्याः व्याख्यानमालायाः प्रथमं व्याख्यानम् अगस्तमासस्य १० दिनाङ्के अहमदाबादनगरे 'अमदावाद-मेनेजमेन्ट-एसोशिएशन' इति स्थाने अभवत् । सुश्रीनेहाकृष्णा कुमारः जयदेवविरचितस्य गीतगोविन्दस्य विषये सुन्दरं व्याख्यानम् अकरोत् । कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण श्रीदर्शकः महेता (वाईस प्रेसिडन्ट रिलाइन्स रिटेल) श्रीमतीभावना रावलः (न्यासी, संस्कृतविद्याप्रतिष्ठानम्) च उपस्थितौ आस्ताम् । अत्र उल्लेखनीयं यत् प्रतिमासम् एकवारम् एतस्याः व्याख्यानमालायाः आयोजनं भविष्यति । उपक्रमोऽयम् आवर्षं प्रचलिष्यति ।

## संस्कृतगरबा

### पावागढ-पर्वते मनोहरे रे

(राग : द्वारका थी प्रभु आवीया रे)

पावागढ-पर्वते मनोहरे रे .....।
सुशोभते महाकाली भक्तवत्सला ॥
दीपावली तत्र राजते रे .....।
प्रकाशो दृश्यते तत्र खलु सर्वदा ॥
नवरात्रीणां हि तूत्सवे रे .....।
शोभतेऽद्भुततमा माता जगदम्बिका ॥
गर्भ-दीपो हि मातुः मस्तके रे .....।
रत्नान्वितो हि विभाति तत्र मण्डले ॥
पुष्पावृते चाँचराङ्गणे रे .....।
योगिनीभिः सह क्रीडति जगदम्बिका ॥
नीलं दुकूलं शोभते रे .....।
विभाति नीलपद्मानना हि अम्बिका ॥
जय जय महाकालिके रे
करोतु मङ्गलं देवि सर्वमङ्गले

✍ सुकुमारः आर. त्रिवेदी

### शिरसि सौवर्णो दीपद्यट

(रागः सोनानो गरबो शिरे अंबे मा...)

शिरसि सौवर्णो दीपद्यटो जगदम्बे
चालय मन्दं मन्दं रे .....
भावविलासै रासे रममाणा
दक्षिणदेशीयवसनानि ...जगदम्बे
षोडशाभरणैः शोभा विवर्धते
मौक्तिकहीरककांचनैः ...जगदम्बे
सखीभिः सार्धं मण्डले चलन्ती
परितस्त्वरिता भ्रमन्ती ...जगदम्बे
अष्टसुगन्धो वायु प्रवाति
पाटलजलेन सुवासितो ...जगदम्बे
वंशीवीणे पूरयतः सुस्वरं
मृदंगो मन्दं मन्दं ...जगदम्बे
माईक्लापी ध्यायन्जगदम्बां
भक्त्या सजले नयने ...जगदम्बे

✍ श्री रामप्रसादः दवे

## कृपया हसन्तु

**रमणः - (पत्नीम् उद्दिश्य) भोः ! नूतनचलनचित्रस्य द्वे चिटिके मया आनीते स्तः । त्वं शीघ्रं सिद्धा भव चलनचित्रं द्रष्टुं गच्छावः ।**

**पत्नी - (चिटिकां दृष्ट्वा) किन्तु एषा तु श्वस्तन-चिटिका अस्ति... ।**

**रमणः - भोः, सज्जा भवितुं किञ्चित् अधिकः समयः तु भविष्यति खलु ।**

★ ★ ★ ★ ★

**नमनः - (एकं कविं प्रति दूरभाषं कृत्वा) भोः कवे ! रविवासरे वर्तमानपत्रे मया तव कविता पठिता । उत्तमा आसीत् । तव भ्रातृजायायै अपि तव कविता अरोचत ।**

**कविः - भ्रातृजायायै धन्यवादं कथयतु, एवं च मम पक्षतः तस्याः चरणस्पर्शम् अपि करोतु ।**

★ ★ ★ ★ ★

**रमणः - (नमनं प्रति) मम पितुः समीपे द्विचक्रिकातः आरभ्य वायुयानपर्यन्तं सर्वाणि यानानि सन्ति ।**

**नमनः - तव पिता कं व्यवसायं करोति ?**

**रमणः - मम पितुः क्रीडनकानाम् आपणः अस्ति ।**

## अहो चातुर्यम्

**– संस्कृतविकिपिडीयाजालस्थानात्**

**निर्माय खलजिह्वाग्रं सर्वप्राणहरं नृणाम् ।**
**चकार हि वृथा शस्त्रविषवह्नीन् प्रजापतिः ॥**

लोके अग्निशस्त्रविषादयः प्राणहरत्वेन ख्याताः । प्रजापतिः प्राणहरणाय आदौ तानि विषादीनि एव असृजत् । किन्तु अनन्तरकाले पिशुनजनानां जिह्वा तेन सृष्टा तत्कार्याय एव । खलजिह्वायाः सृष्टेः अनन्तरं प्राणहरणकार्यं समग्रं तया एव क्रियमाणम् अभवत् इत्यतः विषादीनां सृष्टिः व्यर्था जाता । अपारसामर्थ्यवति वस्तुनि स्थिते अल्पसामर्थ्यवन्ति वस्तूनि अप्रयोजनकारीणि खलु भवन्ति ?

**दन्ताः वदन्ति जिह्वे त्वां दशामः किं करिष्यसि ।**
**एकमेव वचो वच्मि नूनं सर्वे पतिष्यथ ॥**

कदाचित् दन्ताः जिह्वाम् अवदन् – 'हे जिह्वे, वयं बहवः स्मः । भवती एकाकिनी अस्ति । वयं सर्वे सम्भूय भवतीं दशामः चेत् एकाकिनी असाहाया भवती किं वा कुर्यात् ?' इति । तदा जिह्वा शान्तेन स्वरेण अवदत् – 'भवन्तः बहुसंख्यकाः स्युः नाम । एकाकिनी अपि सती अहम् असहाया तु न । यदि भवन्तः मां दशेयुः तर्हि अहं तादृशम् एकं वाक्यं वदिष्यामि येन श्रोता क्रुद्धः सन् हस्तप्रहारेण भवतः सर्वान् पातयेत्' इति । सत्यं खलु – लोके बलवत्त्वम् असहायकता च तत्तस्य बुद्धिमत्ताम् अवलम्बते ?

## ज्ञानसरिता

### चित्तौडीय: विजयस्तम्भ:



भारतस्य इतिहासे चित्तौडस्य दुर्गस्य विशेषमहत्त्वम् अस्ति। ७२८तमे क्रिस्ताब्दे प्रसिद्ध: रजपूतवीर: बप्परावल: एतत् दुर्गं निर्मापितवान्। रजपूता: शौर्येण, पराक्रमेण, प्रगतिपरै: कार्यै:, संस्कृतिपरत्वेन च ख्याता: आसन्। बप्परावलेन निर्मितम् एतत् नगरं मोगलराजै: ध्वस्तीकृतम्।

विश्वविख्याताया: सुन्दर्या: पद्मिन्या: पति: राजा भीमसिंह: अत्रत्य: एव। कृष्णभक्तिकारणत: समग्रे देशे ख्यातया मीराबाय्या निर्मित: कृष्णालय: अत्रैव अस्ति। तस्या: पत्या कुम्भराणावर्येण निर्मापितम् एकं मन्दिरम् अपि अत्र अस्ति।

अत्रत्येषु भवनेषु अतिविशिष्टं भवनम् अस्ति विजयस्तम्भ:। मालवराज: (सुल्तान:) मोहम्मदखिलजी चित्तौडस्य वशीकरणाय आगत्य पराजयं प्राप्य प्रतिगत:। तस्यैव विजयस्य स्मरणार्थम् एष: विजयस्तम्भ: निर्मित:। १४४० तमे क्रिस्ताब्दे कुम्भराणा एतं निर्मापितवान्। एष: १२२ पादौन्नत्ययुत: अस्ति।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सकाश** | निकट | nearness |
| **सकैतव:** | धोखा देने वाला | fraudylent |
| **सङ्कुल** | खचाखच भरा | crowded |
| **सङ्कोच:** | सिकुड़ना | shrinking |
| **सङ्क्षय** | विनाश | destruction |
| **सङ्क्षेप:** | छोटा करना | abridgement |
| **सङ्गर:** | युद्ध | battle |
| **सङ्घात:** | वध | killing |
| **सज्ज:** | तैयार | prepared |
| **सज्जा** | वेशभूषा | dress |
| **सञ्जल्प:** | शोरगुल | uproar |
| **सञ्ज्ञपनम्** | हत्या | killing |
| **सतीर्थ:** | सहपाठी | a class - fellow |
| **सत्यापनम्** | सत्य बोलना | speaking the truth |
| **सत्रप:** | लज्जित | ashamed |

## किं भवन्त: जानन्ति ?

**१) युधिष्ठिरस्य राजसूययज्ञाय भीम: कां दिशं प्रति विजययात्राम् अकरोत्?**

(क) उत्तर (ख) दक्षिण (ग) पश्चिम (घ) पूर्व

**२) यदा भीष्म: शरशय्याया: उपरि अपतत् तदा तस्मै उपाधानस्य जलस्य च व्यवस्थां स्वबाणै: क: अकरोत्?**

(क) श्रीकृष्ण: (ख) अर्जुन: (ग) कर्ण: (घ) एकलव्य:

**३) राजसूययज्ञे युधिष्ठिरस्य अभिषेकावसरे क: स्वर्णमण्डितरथं स्वीकृत्य आगतवान् आसीत्?**

(क) बाह्लीक: (ख) श्रीकृष्ण: (ग) भगदत्त: (घ) द्रुपद:

**४) एतेषु क: इन्द्राय कवचकुण्डले दातुं कर्णं स्वप्ने न्यवारयत्?**

(क) कुन्ती (ख) सूर्य: (ग) श्रीकृष्ण: (घ) परशुराम:

**५) पाण्डवानां दिग्विजययात्रासमये अर्जुन: कां दिशम् अजयत्?**

(क) दक्षिण (ख) पश्चिम (ग) पूर्व (घ) उत्तर

उत्तराणि – (१) घ (२) ख (३) क (४) ख (५) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## संस्कृत-गरबा

निमन्त्रणम्

मान्याः,

एकलव्य-संस्कृत-एकेडेमी द्वारा आयोजिते
संस्कृतगरबाकार्यक्रमे भवतां हार्दं स्वागतम् अस्ति ।

दिनाङ्कः - २९-०९-२०१९ रविवासरः,
समयः - रात्रौ - ८.०० वादने आरम्भः

स्थलम्
कोरहाउस, अपोलोसिटी सेन्टर होस्पिटल समीपे
परिमलगार्डनमार्गः, एलिसब्रिज
अहमदाबाद-३८०००६

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Admission Open

**Do you want to learn Sanskrit ?**
**Here is a chance......**

**Participate in**
**Sanskrit Spoken**
**Programme and learn Sanskrit**

**Date** : 11/10/19 to 12/02/20
**Day** : Mon-Wed-Fri
**Time** : 6.30pm to 8.00pm
**Fees** : 4000/-

- **Venue** : Eklavya Sanskrit Academy
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

### ग्राहक शुल्कम्

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006